संस्कृत-वार्ता:

15.06.2024

सायम् - 06:20

**मुख्यवार्ता:**

- प्रधानमन्त्रिण: नरेन्द्रमोदिन: जी-सप्त-सम्मेलनसम्बद्धा इटलीयात्रा सम्पन्ना, प्रधानमन्त्रिणा प्रोक्तं यत् तेन विश्व-मंचे भारतस्य दृष्टि: स्थापिता।
- उत्तराखण्डे एकस्यां घटनायां त्रयोदश यात्रिण: मृता:।
- छत्तीसगढस्य बस्तरे सुरक्षाबलैः सह सङ्घर्षे अष्टौ उग्रवादिनः मृताः1
- यूक्रेन-युद्धे शान्ति-प्रक्रियाया: आधारं सुनिश्चियं कर्तुम् अद्य स्विट्जरलैण्डदेशे अन्ताराष्ट्रिय-सम्मेलनं भविष्यति।
- आईसीसी इत्यस्यां पुरुषाणां विंशति प्रति विंशति-विश्व-चषक-क्रिकेट्-प्रतिस्पर्धायां अद्य सायं फ्लोरिडानगरस्य सेण्ट्रल-ब्रोवार्ड-पार्क-क्रीडांगणे अन्तिम-समूहस्य स्पर्धायां भारतं कनाडादलं सम्मुखीकरिष्यति।

**प्रधानमन्त्री-प्रत्यावर्तनम्**

प्रधानमन्त्रिण: नरेन्द्रमोदिन: जी-सप्त-सम्मेलनसम्बद्धा इटलीयात्रा सम्पन्ना, प्रधानमन्त्रिणा प्रोक्तं यत् तेन विश्व-मंचे भारतस्य दृष्टि: स्थापिता। प्रधानमन्त्री नरेन्द्रमोदी इटली: अद्य प्रात: नवदिल्लीम्: प्रत्यावर्तितवान्। स: स्वीयां यात्रां सार्थिकाम् उक्तवान्। एकस्मिन् सामाजिक-जन-संचार-माध्यमेन श्रीमोदी न्यगदत् यत् इदमेकं महत्तवपूर्णम् जी-सप्तं शिखर-सम्मेलनमासीत्, यत्र तेन वैश्विक मंचे भारतीया दृष्टि: प्रस्तुता।

**लोकसभासत्रं**

अष्टादश्या: लोकसभाया: प्रथमं संसत्सत्रं अस्य मासस्य चतुर्विंशति-दिनाङ्कात् समारप्स्यते। संसदीयकार्यमन्त्री किरन-रिजिजू: अद्य संसूचितवान् यत् प्रशासनं संसद: कार्याचरणं उचितविधिना सञ्चालयितुं सर्वै: राजनीतिकदलै: सांसदै: सह कार्यनिष्पादनाय सज्जं वर्तते असौ निगदितवान् यत् संसद एतस्मिन् प्रथमे सत्रे नवनिर्वाचितानां सांसदानां शपथवचनं लोकसभाध्याक्षनिर्वाचनं तदनु संसद: उभयो: सदनयो: उपवेशने राष्ट्रपते: अभिभाषणं भविष्यति।

**कृषि-शिवराज:**

केन्द्रीय-कृषिमन्त्री शिवराजसिंहचौहान: प्रोदीरितवान् यत् प्रधानमन्त्री नरेन्द्रमोदी जूनमासस्य अष्टादश दिनांके किसान-सम्मान-निधि-योजनाया: अन्तर्गतं त्रिलक्षाधिक-नवकोटि-कृषकाणां वित्तकोषे भूयोऽपि विंशति सहस्रकोटिरूप्यकाणि हस्तान्तरितं करिष्यति। नवदिल्ल्यां श्रीचौहान: अकथयत् यत् व्यतीतेषु दशसु वर्षेषु साम्प्रतं यावत् एकादशकोटि-कृषकाणां वित्तकोषेषु त्रि-लक्ष-कोटि-रूप्यकाणि सम्प्रेषितानि। असौ जूनमासस्य अष्टादशदिनांके प्रधानमन्त्रिण: कार्यक्रमेऽस्मिन् सम्मिलितुं सर्वान् मुख्यमन्त्रिण: पत्रं लिखितवान्।

## उत्तराखण्ड

उत्तराखण्डे एकस्यां घटनायां त्रयोदश यात्रिण: मृता:। रूद्रप्रयाग-जनपदे बद्रीनाथ-राष्ट्रीय राजमार्गे रैंतौल्या: समीपे यात्रिवाहनं गर्ते पतितवत्। अनेन त्रयोदशजना: मृता:। सप्तयात्रिण: गम्भीररूपेण आहता:। सूचनानुसारेण वाहने षड्विंशति: श्रद्धालव: आरूढा: आसन्। सुरक्षोद्धार अभियानं चलति। राज्यस्य राज्यपाल: गुरमीत-सिंह, मुख्यमन्त्री पुष्कर-सिंह-धामी, केन्द्रीय गृहमंत्री अमितशाहश्च एते घटनां प्रति दु:खं प्रकटितवन्त:।

## छत्तीसगढ-उग्रवादी

छत्तीसगढस्य बस्तरे सुरक्षाबलैः सह सङ्घर्षे अष्टौ उग्रवादिनः मृताः1 अद्य छत्तीसगढस्य बस्तरसंभागे सुरक्षाबलैः सह सङ्घर्षे अष्टौ उग्रवादिनः मृताः। तत्रैव द्वौ सुरक्षिणौ अपि आहतौ इति सूचनास्ति। बस्तरसम्भागस्य अबूझमाडक्षेत्रे उग्रवादिनाम् उपस्थितेः विषये सूचनाधारेण भारत- तिब्बत- सीम- आरक्षिबलेन, जनपद-आरक्षि-बलेन विशेषकार्यबलेन च संयुक्तरूपेण अन्वेषणाभियानम् आरब्धम् आसीत्। अस्मिन् क्षेत्रे अन्वेषणकार्यक्रमः प्रचलति। घटनाविषये विस्तृतसूचना प्रतीक्षिता अस्ति।

## शान्ति-सम्मेलनं-स्विट्जरलैण्ड

यूक्रेन-युद्धे शान्ति-प्रक्रियाया: आधारं सुनिश्चियं कर्तुम् अद्य स्विट्जरलैण्डदेशे अन्ताराष्ट्रिय-सम्मेलनं भविष्यति। एतस्मिन् सम्मेलने प्रायश: शतदेशानां प्रधानमन्त्रिभि: अन्यै: प्रतिनिधिभि: च साकं अन्ताराष्ट्रिय-संघटनानां समावेशनस्य संभावना दरीदृश्यते। उपवेशनमिदं यूक्रेनस्य उत्थापिताधारे एव भवति। अस्य द्विदिवसीयोपवेशनस्य प्रमुखोद्देश्यं यूक्रेनदेशाय अन्ताराष्ट्रिय-समर्थनस्य समर्जनं अस्ति। सम्मेलने रूसदेश: नैव आमन्त्रित:। तत्रैव, भारतं एकमात्रं दक्षिणैशियाई देशो वर्तते यत् सम्मेलने भागं स्वीकरोति। भारतस्य प्रतिनिधित्वं विदेशमन्त्रालयस्य सचिव: पवनकपूर: विधास्यति।

## बिहार-महोत्सव

बिहार-प्रदेशे अद्य राज्यस्तरीय: आम्र-महोत्सव: आमोत्सव-चतुर्विंशत्युत्तर-द्विसहस्रम् इति आरब्ध:। द्विदिवसीय-महोत्सवस्यास्य उद्घाटनं राज्यपालेन राजेन्द्र-विश्वनाथ-आर्लेकर: राजभवन परिसरे कृतवान्। अवसरेऽस्मिन् श्रीआर्लेकर: प्रोक्तवान् यत् बिहारप्रदेशे आम्रोत्पादकं विपणनस्य, प्रसंस्करणस्य असीमिता: संभावना: सन्ति। महोत्सवेऽस्मिन् सहस्रादधिका: कृषका:, उद्यान, कृषिक्षेत्रयो: विशेषज्ञा: वैज्ञानिकाश्च भागं गृह्णन्ति।

## सिक्किम-वृष्टि:

उत्तरी-सिक्किमप्रदेशे चतुर्दिनात् सततं जायमानया: वृष्ट्या सामान्यजीवनं प्रभावितं जातम्। अतिवृष्टे: अनेकेषु स्थानेषु भूस्खलने जातम् अपि च मार्गा: भ्रष्टा: जाता:। सम्पर्कव्यवस्थापि तत्र बाधिता जाता, येनहि क्षेत्रेऽस्मिन् द्वादशशताधिका: पर्यटका: अवरूद्धा: सन्ति। जोंगुक्षेत्र-उत्तरी-सिक्किम-प्रदेशं संयोज्यमानस्य साकलांगक्षेत्रे नवनिर्मितसेतो: भ्रंशात् स्थिति: इतोपि प्रतिकूला जाता।

## आईसीसी-क्रिकेट

आईसीसी इत्यस्यां पुरुषाणां विंशति प्रति विंशति-विश्व-चषक-क्रिकेट्-प्रतिस्पर्धायां अद्य सायं फ्लोरिडानगरस्य सेण्ट्रल-ब्रोवार्ड-पार्क-क्रीडांगणे अन्तिम-समूहस्य स्पर्धायां भारतं कनाडादलं सम्मुखीकरिष्यति। इत: पूर्वं दक्षिणाअफ्रीकादलेन नेपालदलं केवलं एकेन धावनांकेन पराजितम्।

## संस्कृत-साप्ताहिकी

संस्कृतजगता सम्बद्धै: विभिन्नै: क्रियाकलापै: संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्या: एफ.एम.गोल्ड-प्रवाहिकात: रविवासरे मध्याह्ने सार्धैक-वादनत:भविष्यति। कृपया श्रृण्वन्तु।

।। इति वार्ता: ।।